# जराया जरसन्यतरस्याम्

**Dr. G.S.V. Dattatreya Murthy**
Assistant professor in Vyakarana
Department of Sanskrit & IC,
SCSVMV (Deemed to be ) Univeresity
Enathur, Kanchipuram - 631561

**प्रधानांशाः**

सूत्रपरिचयः

सूत्रार्थः

जराशब्दनिष्पत्तिः

जरायाः, जरस्, अन्यतरस्याम् इति पदविभागः। अष्टन आ विभक्तौ इत्यतः विभक्तौ इत्यनुवर्तते। अचि र ऋतः इत्यतः अचीत्यनुवर्तते। जरायाः इति षष्ठ्यन्तम्। अतः षष्ठी स्थाने योगा इति परिभाषया स्थाने इत्यर्थो लभ्यते। अचीति विभक्तौ इत्यस्य विशेषणम्, तेन तदादिविधिः। तथा च अजादौ विभक्तौ इत्यर्थः सिध्यति। तस्मिन्निति निर्दिष्टे पूर्वस्य इति परिभाषया अजव्यवहितपूर्वस्येत्यर्थो बोध्यते. एवञ्च अजादिविभक्त्यव्यवहितपूर्वस्य जराशब्दस्य स्थाने जरसादेशो वैकल्पिकेन भवतीति सूत्रार्थः।

जीर्यन्ते अङ्गानि अनया जरा। जृष् वयोहानौ इति धातोः षिद्भिदादिभ्योङ् इति सूत्रेण अङ्प्रत्ययः। जृ-अ इति स्थिते अङः ङित्वात् क्ङिति च इत्यनेन गुणनिषेधे प्राप्ते ऋदृशोऽङि गुणः इत्यनेन ऋकारस्य गुणः, स च उरण्रपरः इत्यनेन रपरत्वे जर्-अ इति जाते, टापि सवर्णदीर्घे जरा इति रूपं भवति। प्रथमैकवचने सुप्रत्यये हल्ङ्यादिना सुलोपे जरा इति। अस्य जराशब्दस्य अजादिविभक्तिषु वैकल्पिकेन जरसादेशः भवति। ते औ विभक्तौ जरसौ, तदभावे जरौ इति, जसि जरसः, तदभावे जराः इत्येवं रूपाणि भवन्ति।

अत्र सूत्रे विभक्तिग्रहणस्याननुवृत्तौ अजादिप्रत्यये जरसादेशो वा भवतीत्यर्थो लभ्यते। तथा सति अव्ययीभावे शरत्प्रभृतिभ्यः इति गणे जरायाः जरश्च इति टचि जरसादेशविधानं व्यर्थं स्यात्। तथाहि- जरायाः समीपमित्यर्थे अव्ययं विभक्तीत्यादिना समीपार्थक उपेत्यव्ययेन समासे जरा ङस् इत्यलौकिकविग्रहवाक्ये टच्प्रत्ययः, जरसादेशः, विशिष्टात् सुः, अव्ययादाप्सुपः इति लुक् उपजरसम् इति भवति। अत्र सूत्रे विभक्तेरित्यस्याभावे अनेन सूत्रेणैव टचः सिद्धौ पुनर्विधानं व्यर्थं स्यात्। व्यर्थीभूय एवं ज्ञापयति-तद्धिते चेत् समासान्त एवेति। तेन जरायाः इदम् जारम् इति तद्धिते अणि न भवत्येव। अतस्तत्र जरसादेशव्यावृत्यर्थं क्रियमाणं विभक्ताविति व्यर्थमिति चेत् उच्यते, अनेन गणसूत्रेण विकल्पेन जरसादेशो विधीयते, गणसूत्रेण नित्यं बोध्यते। ओतो नित्यत्वार्थं तस्यावश्यकत्वेन नियामकत्वं वक्तुं न शक्यते। अजादौ विभक्ताविति कथनात् जराभ्यामित्यत्र न जरस्।

जराया सरसन्यतरस्याम् इति सूत्रेण जरेति विशिष्टस्य जरसादेशविधानं कुतः, जरायाः असुङ् इति सूत्रं क्रियताम्। अर्धमात्रालाघवमपि वर्तते। यतो हि जरपर्यन्तभागः समान एव वर्तते। असुङित्यत्र उकारङकारयोः इत्संज्ञायां लोपो भवति। ङित्वात् अयं ङिच्च इत्यनेन अन्तादेशो भवति। जरा औ इति स्थिते अनेन जरायाः असुङ् आदेशः, ङित्वात् आकारस्य स्थाने भवति जर् अस् औ-जरसौ इति रूपं भवति। इत्थं रूपाणां सिद्धौ विशिष्टादेशविधानं व्यर्थमिति नाशङ्कनीयम्।

SRI CHANDRASEKHARENDRA SARASWATHI VISWA MAHAVIDYALAYA
KANCHEEPURAM
SCSVMV